# Siddhantavimshatih

## સિદ્ધાન્તવિંશતિઃ

## Document Information

Text title : Siddhantavimshatih

File name : siddhAntaviMshatiH.itx

Category : raama, rAmAnanda, viMshati

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 29, 2024

*sanskritdocuments.org*

# સિદ્ધાન્તવિંશતિઃ

સીતારામૌ જગદ્ધેતૂ દિવ્યદેહૌ ગુણાકરૌ ।
ગુરુદેવં તથા નત્ત્વા કુર્વે સિદ્ધાન્તવિંશતિમ્ ॥

ચિદચિદીશ્વરશ્ચેતિ તત્ત્વત્રયં મતં બુધૈઃ ।
રામ એવેશ્વરો બ્રહ્મ દેહી ચિદચિતોર્મતઃ ॥ ૧॥

ચિતાઽચિતા વિશિષ્ટં ચ તત્ત્વં શ્રીરામ એવ હિ ।
તચ્છરીરાત્ તતશ્ચાથ ભિન્નં તત્ત્વં ન વિદ્યતે ॥ ૨॥

હેયપ્રતિભટો રામોઽનન્તદિવ્યગુણામ્બુધિઃ ।
સગુણઃ સવિશેષોઽસૌ નાવિશિષ્ટો ન નિર્ગુણઃ ॥ ૩॥

જીવો જ્ઞાનસ્વરૂપોઽપિ ધર્મજ્ઞાનગુણાશ્રયઃ ।
જ્ઞાતૈવ વસ્તુતો જીવો મિથ્યા તજ્જ્ઞાતૃતા ન તત્ ॥ ૪॥

દેહમાને ત્વનિત્યત્વં વિભુત્વે ગત્યસમ્ભવઃ ।
અણુત્વમાત્મનસ્તસ્માચ્છાસ્ત્રપ્રમાણતોઽપિ ચ ॥ ૫॥

બદ્ધમુક્તવ્યવસ્થાતઃ સુખી દુઃખીતિ ભેદતઃ ।
જીવા નાના ક્વચિચ્ચૈક્યમુક્તં પ્રકારસામ્યતઃ ॥ ૬॥

ચિદચિદ્દેહિરૂપેણ રામસ્ય પરિણામિતા ।
તત એવાદ્વિતીયત્વં કૂટસ્થત્વં સ્વરૂપતઃ ॥ ૭॥

પરિણામો જગચ્ચૈશશ્ચિદચિદ્દ્વારકો મતઃ ।
વિકારશ્ચ સ્વભાવે હિ જીવાત્મનો બુધૈર્મતઃ ॥ ૮॥

પ્રકૃતેઃ સ સ્વરૂપેઽપિ બ્રહ્મણસ્તૂભયોર્ન સઃ ।
બ્રહ્મભિન્નં પ્રધાનં હિ સત્વાદિત્રિગુણાશ્રયઃ ॥ ૯॥

બ્રહ્મણઃ પરિણામો હિ જગત્ સત્યં મૃષા ન તત્ ।
મન્યતે ન વિવર્ત્તોઽત્ર શ્રૌતયૌક્તિકબાધતઃ ॥ ૧૦॥

પ્રતીયતે જગત્ સત્યં સત્ખ્યાતિઃ સમ્મતા હિ તત્ ।
પ્રામાણિકી ન ચાવિદ્યા હ્યનિર્વાચ્યં જગન્ન તત્ ॥ ૧૧॥

પ્રત્યક્ષમનુમાનં ચ શબ્દરૂપં તથૈવ ચ ।
પ્રમાકરણરૂપં હિ પ્રમાણં ત્રિવિધં મતમ્ ॥ ૧૨॥

શુક્તિરૌપ્યસ્થલે સત્યં શુક્તિરૌપ્યં પ્રતીયતે ।
પઞ્ચીકરણતઃ શુક્તૌ સ્વલ્પરૌપ્યાંશસત્ત્વતઃ ॥ ૧૩॥

સ્વપ્નદૃષ્ટાઃ પદાર્થાશ્ચ સત્યભૂતા મૃષા ન હિ ।
કર્ત્તા સ્વપ્નરથાદીનામીશ્વરઃ કથિતઃ શ્રુતૌ ॥ ૧૪॥

તત્ત્વમસ્યાદિશાસ્ત્રં ચ સત્યમેવ મૃષા ન હિ ।
તાત્ત્વિકં બોધ્યતે તેન પ્રકાર્યદ્વૈતમેવ હિ ॥ ૧૫॥

વૈરાગ્યં કર્મણો યસ્માત્ ફલાનિત્યત્વવેદનાત્ ।
ઉપાર્જ્ય કર્મવિજ્ઞાનં બ્રહ્મજ્ઞાનં તદર્જયેત્ ॥ ૧૬॥

ભવન્તિ સુખદુઃખાનિ જીવતશ્ચાત્મનોઽત્ર તત્ ।
જીવન્મુક્તિર્ન સિધ્દ્ધાન્તે વૈદિકે સ્વીકૃતા બુધૈઃ ॥ ૧૭॥

પ્રારબ્ધકર્મણો નાશે દેહાન્તે ચાર્ચિરાદિના ।
સાકેતે બ્રહ્મસામ્યં હિ ગતો મુક્તો નરઃ સ્મૃતઃ ॥ ૧૮॥

સામ્યસ્ય ભેદગર્ભત્વાન્મુક્તાવપ્યુરરીકૃતઃ ।
ભેદો જીવાત્મનશ્ચાથ બ્રહ્મણો બુધ્દ્ધિશાલિભિઃ ॥ ૧૯॥

મુક્તૌ ચ દુઃખહેતુર્ન સુખં તુ સર્વતોઽધિકમ્ ।
ભક્ત્યા ચાથ પ્રપત્ત્યૈવ નિત્યા મુક્તિર્ન ચાન્યથા ॥ ૨૦॥

શ્રિયાનન્દાર્યશિષ્યેણ હર્યાનન્દેન નિર્મિતા ।
સિધ્દ્ધાન્તવિંશતિર્ભૂયાત્ સત્યસિધ્દ્ધાન્તબોધિની ॥

ઇતિ પ્રતિપક્ષિભયઙ્કર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિધ્દ્ધશિરોમણિ પ્રણીતા સિધ્દ્ધાન્તવિંશતિઃ સમ્પૂર્ણા ।

Proofread by Parashara Ranganathan

*Siddhantavimshatih*

pdf was typeset on January 29, 2024

Please send corrections to *sanskrit@cheerful.com*